# ॐ श्री परमात्मने नमः। अथ चतुर्दशोऽध्यायः। गुणत्रयविभागयोगः।

| | |
|---|---|
| श्रीभगवानुवाच<br>परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्।<br>यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः॥ १॥ | सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते।<br>ज्ञानं यदा तदा विद्यात् विवृद्धं सत्त्वमित्युत॥ ११॥ |
| इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।<br>सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥ २॥ | लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा।<br>रजस्येतानि जायन्ते विवृद्धे भरतर्षभ॥ १२॥ |
| मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्।<br>संभवः सर्वभूतानाम् ततो भवति भारत॥ ३॥ | अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।<br>तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन॥ १३॥ |
| सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः।<br>तासां ब्रह्म महद्योनिः अहं बीजप्रदः पिता॥ ४॥ | यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्।<br>तदोत्तमविदां लोकान् अमलान्प्रतिपद्यते॥ १४॥ |
| सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः।<br>निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥ ५॥ | रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते।<br>तथा प्रलीनस्तमसि मूढयोनिषु जायते॥ १५॥ |
| तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।<br>सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥ ६॥ | कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम्।<br>रजसस्तु फलं दुःखम् अज्ञानं तमसः फलम्॥ १६॥ |
| रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।<br>तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥ ७॥ | सत्त्वात्सञ्जायते ज्ञानम् रजसो लोभ एव च।<br>प्रमादमोहौ तमसः भवतोऽज्ञानमेव च॥ १७॥ |
| तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।<br>प्रमादालस्यनिद्राभिः तन्निबध्नाति भारत॥ ८॥ | ऊर्ध्वं गच्छन्ति सत्त्वस्थाः मध्ये तिष्ठन्ति राजसाः।<br>जघन्यगुणवृत्तिस्थाः अधो गच्छन्ति तामसाः॥ १८॥ |
| सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत।<br>ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत॥ ९॥ | नान्यं गुणेभ्यः कर्तारम् यदा द्रष्टानुपश्यति।<br>गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति॥ १९॥ |
| रजस्तमश्चाभिभूय सत्त्वं भवति भारत।<br>रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा॥ १०॥ | गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान्।<br>जन्ममृत्युजरादुःखैः विमुक्तोऽमृतमश्नुते॥ २०॥ |

| | |
|---|---|
| अर्जुन उवाच<br>कैर्लिङ्गैस्त्रीन्गुणानेतान्   अतीतो भवति प्रभो।<br>किमाचारः कथं चैतान्   त्रीन्गुणानतिवर्तते॥ २१॥ | मानापमानयोस्तुल्यः   तुल्यो मित्रारिपक्षयोः।<br>सर्वारम्भपरित्यागी   गुणातीतः स उच्यते॥ २५॥ |
| श्रीभगवानुवाच<br>प्रकाशं च प्रवृत्तिं च   मोहमेव च पाण्डव।<br>न द्वेष्टि संप्रवृत्तानि   न निवृत्तानि काङ्क्षति॥ २२॥ | मां च योऽव्यभिचारेण   भक्तियोगेन सेवते।<br>स गुणान्समतीत्यैतान्   ब्रह्मभूयाय कल्पते॥ २६॥ |
| उदासीनवदासीनः   गुणैर्यो न विचाल्यते।<br>गुणा वर्तन्त इत्येव   योऽवतिष्ठति नेङ्गते॥ २३॥ | ब्रह्मणो हि प्रतिष्ठाहम्   अमृतस्याव्ययस्य च।<br>शाश्वतस्य च धर्मस्य   सुखस्यैकान्तिकस्य च॥ २७॥ |
| समदुःखसुखः स्वस्थः   समलोष्टाश्मकाञ्चनः।<br>तुल्यप्रियाप्रियो धीरः   तुल्यनिन्दात्मसंस्तुतिः॥ २४॥ | |

ॐ तत् सत्

इति श्रीमद् भगवद् गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे

गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः॥

om śrī paramātmane namaḥ. atha caturdaśo'dhyāyaḥ.

guṇatrayavibhāgayogaḥ.

| | | |
|---|---|---|
| śrībhagavānuvāca<br>paraṁ bhūyaḥ pravakṣyāmi<br>jñānānāṁ jñānamuttamam<br>yajjñātvā munayaḥ sarve<br>parāṁ siddhimito gatāḥ 1 | rajo rāgātmakaṁ viddhi<br>tṛṣṇāsaṅgasamudbhavam<br>tannibadhnāti kaunteya<br>karmasaṅgena dehinam 7 | aprakāśo'pravṛttiśca<br>pramādo moha eva ca<br>tamasyetāni jāyante<br>vivṛddhe kurunandana 13 |
| idaṁ jñānamupāśritya<br>mama sādharmyamāgatāḥ<br>sarge'pi nopajāyante<br>pralaye na vyathanti ca 2 | tamastvajñānajaṁ viddhi<br>mohanaṁ sarvadehinām<br>pramādālasyanidrābhiḥ<br>tannibadhnāti bhārata 8 | yadā sattve pravṛddhe tu<br>pralayaṁ yāti dehabhṛt<br>tadottamavidāṁ lokān<br>amalānpratipadyate 14 |
| mama yonirmahadbrahma<br>tasmingarbhaṁ dadhāmyaham<br>saṁbhavaḥ sarvabhūtānām<br>tato bhavati bhārata 3 | sattvaṁ sukhe sañjayati<br>rajaḥ karmaṇi bhārata<br>jñānamāvṛtya tu tamaḥ<br>pramāde sañjayatyuta 9 | rajasi pralayaṁ gatvā<br>karmasaṅgiṣu jāyate<br>tathā pralīnastamasi<br>mūḍhayoniṣu jāyate 15 |
| sarvayoniṣu kaunteya<br>mūrtayaḥ saṁbhavanti yāḥ<br>tāsāṁ brahma mahadyoniḥ<br>ahaṁ bījapradaḥ pitā 4 | rajastamaścābhibhūya<br>sattvaṁ bhavati bhārata<br>rajaḥ sattvaṁ tamaścaiva<br>tamaḥ sattvaṁ rajastathā 10 | karmaṇaḥ sukṛtasyāhuḥ<br>sāttvikaṁ nirmalaṁ phalam<br>rajasastu phalaṁ duḥkham<br>ajñānaṁ tamasaḥ phalam 16 |
| sattvaṁ rajastama iti<br>guṇāḥ prakṛtisaṁbhavāḥ<br>nibadhnanti mahābāho<br>dehe dehinamavyayam 5 | sarvadvāreṣu dehe'smin<br>prakāśa upajāyate<br>jñānaṁ yadā tadā vidyāt<br>vivṛddhaṁ sattvamityuta 11 | sattvātsañjāyate jñānam<br>rajaso lobha eva ca<br>pramādamohau tamasaḥ<br>bhavato'jñānameva ca 17 |
| tatra sattvaṁ nirmalatvāt<br>prakāśakamanāmayam<br>sukhasaṅgena badhnāti<br>jñānasaṅgena cānagha 6 | lobhaḥ pravṛttirārambhaḥ<br>karmaṇāmaśamaḥ spṛhā<br>rajasyetāni jāyante<br>vivṛddhe bharatarṣabha 12 | ūrdhvaṁ gacchanti sattvasthāḥ<br>madhye tiṣṭhanti rājasāḥ<br>jaghanyaguṇavṛttisthāḥ<br>adho gacchanti tāmasāḥ 18 |

| | | |
|---|---|---|
| nānyaṁ guṇebhyaḥ kartāram<br>yadā draṣṭānupaśyati<br>guṇebhyaśca paraṁ vetti<br>madbhāvaṁ so'dhigacchati 19 | śrībhagavānuvāca<br>prakāśaṁ ca pravṛttiṁ ca<br>mohameva ca pāṇḍava<br>na dveṣṭi saṁpravṛttāni<br>na nivṛttāni kāṅkṣati 22 | mānāpamānayostulyaḥ<br>tulyo mitrāripakṣayoḥ<br>sarvārambhaparityāgī<br>guṇātītaḥ sa ucyate 25 |
| guṇānetānatītya trīn<br>dehī dehasamudbhavān<br>janmamṛtyujarāduḥkhaiḥ<br>vimukto'mṛtamaśnute 20 | udāsīnavadāsīnaḥ<br>guṇairyo na vicālyate<br>guṇā vartanta ityeva<br>yo'vatiṣṭhati neṅgate 23 | māṁ ca yo'vyabhicāreṇa<br>bhaktiyogena sevate<br>sa guṇānsamatītyaitān<br>brahmabhūyāya kalpate 26 |
| arjuna uvāca<br>kairliṅgaistrīnguṇānetān<br>atīto bhavati prabho<br>kimācāraḥ kathaṁ caitān<br>trīnguṇānativartate 21 | samaduḥkhasukhaḥ svasthaḥ<br>samaloṣṭāśmakāñcanaḥ<br>tulyapriyāpriyo dhīraḥ<br>tulyanindātmasaṁstutiḥ 24 | brahmaṇo hi pratiṣṭhāham<br>amṛtasyāvyayasya ca<br>śāśvatasya ca dharmasya<br>sukhasyaikāntikasya ca 27 |

om tat sat

iti śrīmad bhagavad gītāsu upaniṣatsu brahmavidyāyāṁ yogaśāstre

śrīkṛṣṇārjunasaṁvāde guṇatrayavibhāgayogo nāma caturdaśo'dhyāyaḥ